ऋषे विषभेदे न० हेमच०  [ कन्दे राजनि० ।

**करवीरकन्दसंज्ञ** पु० करवीरकस्य संज्ञा संज्ञाऽस्य । तैल-

**करवीरभुजा** स्त्री करवीरस्य भुज इव भुजोऽस्याः । आढ-क्याम् (अरहर) राजनि०  [ (अरहर) शब्दचि०

**करवीरभूषा** स्त्री करवीरस्य भूषेव भूषा यस्याः। आढक्याम् ।

**करवीराद्य** न० करवीरमाद्यं यत्र । "करवीरपुष्पं जात्यशनमल्लिकायाश्च । एतैः समन्तु तैलम् नामार्शो-नाशनञ्च श्रेष्ठम्" इति चक्रदत्तोक्ते तैलभेदे ।

**करवीरी** स्त्री कृ–भावे अप् कराय विक्षेपाय वीरः पुत्रोऽस्याः । १अदितौ तत्पुत्राणां सुरक्षेपकत्वात्तस्यास्तथात्वम् । कं सुखं राति रा–क करः सुखदः वीरः पुत्रोऽस्याः। २पुत्रवत्यां स्त्रियाञ्च मेदि० सर्व्वतः गौरा०ङीष् ।

**करवीर्य्य** पु० करवीरे पुरे भवः यत् । धन्वन्तरिं प्रति आयुर्वेदज्ञानाय प्रश्नकारके ऋषिभेदे । "काशिराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" सुश्रु० ।

**करशाखा** स्त्री करस्य शाखेव । अङ्गुलौ अमरः । अङ्गुलशब्दस्य परिमाणविशेषे परिभाषिकत्वेऽपि अस्य तदर्थे पारिभाषिकत्वकल्पनं शब्दकल्पद्रुमे निर्मूलमेव ।

**करशीकर** पु० करस्य हस्तिहस्तस्य शीकरः । हस्तिहस्तात् निर्गते जलकणे अमरः ।

**करशुद्धि** स्त्री ६त० । फड़िति मन्त्रेण गन्धपुष्पाभ्यां हस्तयोः शोधने । "आदावस्त्रादिकन्यासः करशुद्धिस्ततः परम्" तन्त्रसा० ।

**करशूक** पु० करस्य शूकः शूचीव । नखे । त्रिका० ।

**करस्** न० कृ–असुन् । कर्मणि । "प्र ते पूर्वाणि करणानि विप्रा विद्वाँ आह विदुषे करांसि" ऋ० ४,१९,२० । "करांसि कर्माणि" भा० ।

**करसूत्र** न०६त०। विवाहादौ हस्ते मङ्गलार्थं बध्यमाने सूत्रे ।

**करस्थालिन्** पु० करः स्थालीवास्यस्य ब्रीह्या० इनि । महादेवे "तलस्तालः करस्थाली ऊर्द्ध्वसंहननो महान्" भा० अनु० १७ अ० शिवसहस्रनामकथने । तस्य कालरूपेण सर्वभूतानां करस्थपस्थाल्यैव पचनात्तथात्वम् ।

**करस्न** पु० करणं करः कृ–बा० अप् तं स्नाति करोति धातूनामनेकार्थत्वात् स्ना–क । कर्मकरे बाहौ निरु० "रेवत्सम्रा करस्ना दधिषे वपूंषि" ऋ० ३,१८,५ । करस्ना कर्माणि प्रस्नातारौ बाहू" भा० "पृथू करस्ना बहुला गभस्ती" ऋ०६,१९,२ । एतादृशमधिकृत्य "करस्ना बाहू कर्मणां प्रस्नातारौ" निरु० ६,१६ निरुक्तिर्दर्शिता ।

**करहाट** पु०करैः सूर्य्यकिरणैः हाट्यते दीप्यते हट–दीप्तौ णिच् कर्म्मणि घञ् । १पद्मादिमूले, अमरः करं हाटयति हट–णिच् अण् । २मदनद्रुमे, ३देशभेदे च । मेदिनिः । ४पिण्डीतकतरौ राजनि० ।

**करहाटक** पु० करं हाटयति हट–दीप्तौ णिच्–ण्वुल् । १मदनवृक्षे । करहाटकार्जुनककुभेत्यादि सुश्रु० । ६त० । २हस्ताभरणे सुवर्णे । अमरः ।  [हारा० ।

**कराङ्कण** न०करस्य राजस्वादानस्याङ्कणम् । राजस्वादानस्थाने ।

**कराघात** पु० ६त० । करतलाघाते चपेटाघाते (चापड़मारा)

**कराट** त्रि०कराय विक्षेपायाटति अट्+अच् । विकटे शब्दचि०

**करामर्द** पु० करमामृद्नाति आ+मृद्–अण् उप० स० । करमर्दे शब्दर० ।

**कराम्बुक** पु० कीर्य्यते कृ–कर्मणि अप् करमम्बु यतः कप् । (पाणिया आमला) करमर्द्दभेदे शब्दच० ।  [राजनि० ।

**कराम्लक** पु० करं कीर्य्यमाणयम्लं यतः कप् । करमर्द्दवृक्षे

**करायिका** स्त्री कर इवाचरति कर+आचारे क्यङ् ण्वुल् । १बलाकायाम् तस्याः सङ्कुचितहस्तवत् प्रकाशमानत्वात्तथात्वम् । २कूटपूर्य्याम् शब्दचि०  [त्रिका० ।

**करारोट** पु० करे आरोटते रुट–दीप्तौ अच् । अङ्गुरीयके

**कराल** पु० कराय विक्षेपायालति पर्य्याप्नोति करं लाति ला–क वा । १सर्जरसयुक्ततैले (तेलधुना) २कृष्णकुठेरके (कालतुलसी)३वृक्षे ४दन्तुरे उन्नतदन्ते (दाँतो) ५भयानके त्रि० मेदि० । "करालवदनां घोराम्" "घोरदंष्ट्रां करालास्याम्" श्यामाध्यानम् । "वपुर्महोरगस्येव करालफणमण्डलम्" रघुः "लम्बा कराला विनता तथैव बहुपुत्रिका" "दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका" (पूतना) सुश्रु० । (अनन्तमूल) ६शारिवौषधौ स्त्री राजनि० । गौरा०ङीष् ।८अग्नेर्जिह्वाभेदे जटाधरः । सा च तामसी यथाह शा०ति० "विश्वमूर्त्तिस्फुलिङ्गिन्यौ धूम्रवर्णा मनोजवा । लोहिताख्या करालो च काली तामस ईरिताः" । संज्ञायां कन् अत इत्वम् । करालिका राजसवह्निजिह्वायाम् । "पद्मरागा सुवर्णाख्या तृतीया भद्रलोहिता । लोहितानन्तरं श्वेता धूमिनी च करालिका । राजस्योरसना वह्नेर्विहिताः काम्यकर्मसु" अग्निजिह्वशब्दे दर्शितवाक्यन्तु सामान्यविषयम् । ९दन्तरोगभेदे पु० । "शनैः शनैर्विकुरुते वायुर्दन्तसमाश्रितः। करालान् विकृतान् दन्तान् करालो न स